# Vighnaraja Stuti by Mamasura

# વિઘ્નરાજસ્તુતિઃ મમાસુરેણ પ્રોક્તા

## Document Information

Text title : Vighnaraja Stuti by Mamasura

File name : vighnarAjastutiHmamAsureNaproktA.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : Ajit Krishnan

Proofread by : Ajit Krishnan, PSA Easwaran

Description/comments : Mudgalapurana, Khanda 7, Adhyaya 8

Latest update : April 23, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# વિઘ્નરાજસ્તુતિઃ મમાસુરેણ પ્રોક્તા

મમાસુરઃ પ્રસન્નાત્મા કાવ્યેન વિઘ્નનાયકમ્ ।
જગામ તં પ્રણમ્યૈવ પુપૂજે ભક્તિસંયુતઃ ॥ ૯॥

પુનઃ પ્રણમ્ય વિઘ્નેશં કૃત્વા કરપુટં પ્રિયે! ।
તુષ્ટાવ હર્ષસંયુક્તો જ્ઞાત્વા તં બ્રહ્મનાયકમ્ । ૧૦
મમાસુર ઉવાચ -
વિઘ્નેશાય નમસ્તુભ્યં સર્વસત્તાપ્રચાલિને ।
અનાદયે પરેશાય બ્રહ્મેશાય નમો નમઃ ॥ ૧૧॥

ગણેશાય ગણાનાં તુ ચાલકાય પરાત્મને ।
આનન્દાય સદાનન્દદાયકાય નમો નમઃ ॥ ૧૨॥

હેરમ્બાયૈકદન્તાય શૂર્પકર્ણાય ઢુણ્ઢયે ।
લમ્બોદરાય વૈ તુભ્યં ભક્તપાલ! નમો નમઃ ॥ ૧૩॥

સ્વાનન્દપતયે તુભ્યં યોગાકારસ્વરૂપિણે ।
શાન્તિભ્યઃ શાન્તિદાત્રે તે શાન્તિસ્થાય નમો નમઃ ॥ ૧૪॥

જ્યેષ્ઠરાજાય પૂજ્યાય સર્વેષાં સર્વનાયક! ।
વિનાયકાય દેવાનાં દૈત્યાનાં પાલકાય તે ॥ ૧૫॥

આદિપૂજ્યાય ચાન્તે તેઽવશિષ્ટાય તે નમઃ ।
સિદ્ધિબુદ્ધિપતે તુભ્યં ચતુર્ભુજ! નમો નમઃ ॥ ૧૬॥

શેષસ્યોપરિ સંસ્થાય નાગેશધ્વજધારિણે ।
ગજાનનાય દેવેશ! નમો દૈત્યેશરૂપિણે ॥ ૧૭॥

ભક્તાનાં વિઘ્નહન્ત્રે તે હ્યભક્તાનાં વિનાશિને ।
યોગિનાં સમભાવાય હૃદિસ્થાય નમો નમઃ ॥ ૧૮॥

નાનાભેદમયં બ્રહ્માસદ્રૂપં વેદવાદતઃ ।

ભેદહીનં ચ સદ્રૂપં તયોઃ સામ્યે ત્વમઞ્જસા ॥ ૧૯॥

સમસ્વાનન્દસંસ્થો યઃ કો જાનાતિ ચ તં પ્રભુમ્ ।
વિઘ્નરાજં પ્રપશ્યામિ પ્રત્યક્ષં બ્રહ્મનાયકમ્ ॥ ૨૦॥

તેનાઽહં કૃતકૃત્યશ્ચાઽધુના જાતો ન સંશયઃ ।
ધન્યં મે જન્મકર્માદિ યેન દૃષ્ટો ગજાનનઃ ॥ ૨૧॥

કિં સ્તૌમિ ત્વાં ગણેશાન! યત્ર વેદાદયઃ પ્રભો! ।
શાન્તિં પ્રાપ્તા વિશેષેણ યોગિનસ્તે નમો નમઃ ॥ ૨૨॥

વિઘ્નેશ ઉવાચ -
ત્વયા કૃતમિદં સ્તોત્રં મદીયં સર્વદં ભવેત્ ।
સકામેભ્યો વિશેષેણ નાનાકામપ્રદાયકમ્ ॥ ૨૫॥

નિષ્કામેભ્યો મહામોક્ષદાયકં પ્રભવિષ્યતિ ।
મમ ભક્તિપ્રદં ચૈતન્મમ ભાવહરં સદા ॥ ૨૬॥

ઇતિ મમાસુરેણપ્રોક્તા વિઘ્નરાજસ્તુતિઃ સમાપ્તા । ૭.૮

Encoded by Ajit Krishnan
Proofread by Ajit Krishnan, PSA Easwaran

*Vighnaraja Stuti by Mamasura*
pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*